श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્‌ભાગવત રસિક કુટુંબ

## વેણુ ગીત



सुध बुध खोकर हुई बावरी, सुन मुरली की मधुर तान।
कृष्ण मिलन की आशा प्रकटी, ऐसा निर्मल वेणु गान ।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**

**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**

**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્‌ભાગવતમહાપુરાણમ્**

**દશમઃ સ્કન્ધઃ**

**|| અથૈકવિંશોઽધ્યાયઃ ||**

**શ્રીશુક ઉવાચ**

**ઇત્થં(મ્) શરત્સ્વચ્છજલં(મ્) પદ્માકરસુગન્ધિના .**

**ન્યવિશદ્ વાયુના વાતં(મ્) સગોગોપાલકોઽચ્યુતઃ .. ૧..**

શરત્ + સ્વચ્છ + જલં(મ્), સગો + ગોપા + લકોઽચ્યુતઃ

**કુસુમિતવનરાજિશુષ્મિભૃં(ઙ્)ગ-**

**દ્વિજકુલઘુષ્ટસરઃ(સ્)સરિન્મહીધ્રમ્ .**

**મધુપતિરવગાહ્ય ચારયન્ ગાઃ(સ્),**

**સહપશુપાલબલશ્ચુકૂજ વેણુમ્ .. ૨..**

કુસુમિ + તવનરા + જિશુષ્મિ + ભૃં(ઙ્)ગ, દ્વિજકુ + લઘુષ્ટ + સરઃ(સ્)

સરિન્ + મહીધ્રમ્ , મધુપતિ + રવગાહ્ય ,સહપશુપા + લબલશ્ + ચુકૂજ

તદ્ વ્રજસ્ત્રિય આશ્રુત્ય, વેણુગીતં(મ્) સ્મરોદયમ્ .

કાશ્ચિત્ પરોક્ષં(ઙ્) કૃષ્ણસ્ય, સ્વસખીભ્યોઽન્વવર્ણયન્ .. ૩..

સ્વસખી + ભ્યોઽન્ + વવર્ણયન્

તદ્ વર્ણયિતુમારબ્ધાઃ(સ્), સ્મરન્ત્યઃ(ખ્) કૃષ્ણચેષ્ટિતમ્ .

નાશકન્ સ્મરવેગેન, વિક્ષિપ્તમનસો નૃપ .. ૪..

વર્ણ + યિતુમા + રબ્ધાઃ(સ્), કૃષ્ણ + ચેષ્ટિતમ્ , સ્મ + રવેગેન, વિક્ષિપ્ + તમનસો

બર્હાપીડં(ન્) નટવરવપુઃ(ખ્) કર્ણયોઃ(ખ્) કર્ણિકારં(મ્),

બિભ્રદ્ વાસઃ(ખ્) કનકકપિશં(મ્) વૈજયન્તીં(ઞ્) ચ માલામ્ .

રન્ધ્રાન્ વેણોરધરસુધયા પૂરયન્ ગોપવૃન્દૈર્-

વૃન્દારણ્યં(મ્) સ્વપદરમણં(મ્) પ્રાવિશદ્ ગીતકીર્તિઃ .. ૫..

બિભ્રદ્ + વાસઃ(ખ્), વેણો + રધ + રસુધયા

ઇતિ વેણુરવં(મ્) રાજન્, સર્વભૂતમનોહરમ્ .

શ્રુત્વા વ્રજસ્ત્રિયઃ(સ્) સર્વા, વર્ણયન્ત્યોઽભિરેભિરે .. ૬..

વર્ણ + યન્ત્યોઽ + ભિરેભિરે

ગોપ્ય ઊચુઃ

અક્ષણ્વતાં(મ્) ફલમિદં(ન્) ન પરં(મ્) વિદામઃ(સ્)

સખ્યઃ(ફ્) પશૂનનુ વિવેશયતોર્વયસ્યૈઃ .

વક્ત્રં(મ્) વ્રજેશસુતયોરનુવેણુ જુષ્ટં(મ્)

યૈર્વા નિપીતમનુરક્તકટાક્ષમોક્ષમ્ .. ૭..

અક્ષણ્ + વતાં(મ્),વિવે + શયતોર્ + વયસ્યૈઃ, વ્રજે + શસુતયો + રનુવેણુ ,નિપી + તમનુરક્ત + કટાક્ષમોક્ષમ્

ચૂતપ્રવાલબર્હસ્તબકોત્પલાબ્જ-

માલાનુપૃક્તપરિધાનવિચિત્રવેષૌ .

મધ્યે વિરેજતુરલં(મ્) પશુપાલગોષ્ઠ્યાં(મ્)

રં(ઙ્)ગે યથા નટવરૌ ક્વ ચ ગાયમાનૌ .. ૮..

ચૂત+ પ્રવા+ લબર્હસ્+ તબ+ કોત્+ પલાબ્જ, માલા+ નુપૃક્ત+ પરિધા+ નવિચિત્ર+ વેષૌ, પશુપા+ લગોષ્ઠ્યાં(મ્)

ગોપ્યઃ(ખ્) કિમાચરદયં(ઙ્) કુશલં(મ્) સ્મ વેણુર્-
દામોદરાધરસુધામપિ ગોપિકાનામ્ .
ભુઙ્ક્તે સ્વયં(મ્) યદવશિષ્ટરસં(મ્) હ્રદિન્યો,
હૃષ્યત્ત્વચોઽશ્રુમુમુચુસ્તરવો યથાઽઽર્યાઃ .. ૯..

કિમા+ ચરદયં(ઙ્),દામોદરા+ ધરસુધા+ મપિ ,યદવ+ શિષ્ટરસં(મ્), હૃષ્યત્+ ત્વચોઽ+ શ્રુમુમુચુસ્+ તરવો

વૃન્દાવનં(મ્) સખિ ભુવો વિતનોતિ કીર્તિં(મ્)
યદ્ દેવકીસુતપદામ્બુજલબ્ધલક્ષ્મિ .
ગોવિન્દવેણુમનુ મત્તમયૂરનૃત્યં(મ્)
પ્રેક્ષ્યાદ્રિસાન્વપરતાન્યસમસ્તસત્ત્વમ્ .. ૧૦..

દેવકી + સુતપદામ્ + બુજલબ્ધ + લક્ષ્મિ ,મત્ + તમયૂ + રનૃત્યં(મ્)

પ્રેક્ષ્યા + દ્રિસાન્ + વપરતાન્ + યસમસ્ + તસત્ત્વમ્

ધન્યાઃ(સ્) સ્મ મૂઢમતયોઽપિ હરિણ્ય એતા,
યા નન્દનન્દનમુપાત્તવિચિત્રવેષમ્ .
આકર્ણ્ય વેણુરણિતં(મ્) સહકૃષ્ણસારાઃ(ફ્)
પૂજાં(ન્) દધુર્વિરચિતાં(મ્) પ્રણયાવલોકૈઃ .. ૧૧..

મૂઢ + મતયોઽપિ, નન્દનન્દ + નમુપાત્ + તવિચિત્રવેષમ્

વેણુ + રણિતં(મ્),દધુર્ + વિરચિતાં(મ્),પ્રણયા + વલોકૈઃ

કૃષ્ણં(ન્) નિરીક્ષ્ય વનિતોત્સવરૂપશીલં(મ્)
શ્રુત્વા ચ તત્ક્વણિતવેણુવિચિત્રગીતમ્ .
દેવ્યો વિમાનગતયઃ(સ્) સ્મરનુન્નસારા,
ભ્રશ્યત્પ્રસૂનકબરા મુમુહુર્વિનીવ્યઃ .. ૧૨..

વનિતોત્ + સવરૂ + પશીલં(મ્), તત્ + ક્વણિ + તવે + ણુવિચિત્રગીતમ્

વિમા + નગતયઃ(સ્),સ્મરનુન્ + નસારા

ભ્રશ્યત્ + પ્રસૂ + નકબરા,મુમુહુર્ + વિનીવ્યઃ

ગાવશ્ચ કૃષ્ણમુખનિર્ગતવેણુગીત-
પીયૂષમુત્તભિતકર્ણપુટૈઃ(ફ્) પિબન્ત્યઃ .
શાવાઃ(સ્) સ્નુતસ્તનપયઃ(ખ્) કવલાઃ(સ્) સ્મ તસ્થુર્-
ગોવિન્દમાત્મનિ દૃશાશ્રુકલાઃ(સ્) સ્પૃશન્ત્યઃ .. ૧૩..

કૃષ્ણમુખ + નિર્ગત + વેણુગીત,પીયૂ + ષમુત્તભિત + કર્ણપુટૈઃ(ફ્)
સ્નુતસ્ + તનપયઃ(ખ્),ગોવિન્ + દમાત્મનિ
દૃશા + શ્રુકલાઃ(સ્)

પ્રાયો બતામ્બ વિહગા મુનયો વનેઽસ્મિન્,
કૃષ્ણેક્ષિતં(ન્) તદુદિતં(ઙ્) કલવેણુગીતમ્ .
આરુહ્ય યે દ્રુમભુજાન્ રુચિરપ્રવાલાન્,
શૃણ્વન્ત્યમીલિતદૃશો વિગતાન્યવાચઃ .. ૧૪.

રુચિર + પ્રવાલાન્ ,શૃણ્વન્ત્ય + મીલિ + તદૃશો
વિગતાન્ + યવાચઃ

નદ્યસ્તદા તદુપધાર્ય મુકુન્દગીત-
માવર્તલક્ષિતમનોભવભગ્નવેગાઃ .
આલિં(ઙ્)ગનસ્થગિતમૂર્મિભુજૈર્મુરારેર્-
ગૃહ્ણન્તિ પાદયુગલં(ઙ્) કમલોપહારાઃ .. ૧૫..

તદુ + પધાર્ય,માવર્ + તલક્ષિ + તમનો + ભવભગ્ + નવેગાઃ
આલિં(ઙ્)ગનસ્ + થગિતમૂર્ + મિભુજૈર્ + મુરારેર્ ,કમલો + પહારાઃ

દૃષ્ટ્વાઽઽતપે વ્રજપશૂન્ સહ રામગોપૈઃ(સ્)
સં(ચ્)ચારયન્તમનુ વેણુમુદીરયન્તમ્ .
પ્રેમપ્રવૃદ્ધ ઉદિતઃ(ખ્) કુસુમાવલીભિઃ(સ્)
સખ્યુર્વ્યધાત્ સ્વવપુષામ્બુદ આતપત્રમ્ .. ૧૬..

સં(ચ્)ચા + રયન્ + તમનુ ,વેણુમુદી + રયન્તમ્
કુસુમા + વલીભિઃ(સ્),સખ્યુર્ + વ્યધાત્ ,સ્વ + વપુષામ્ + બુદ

પૂર્ણાઃ(ફ્) પુલિન્ધ્ય ઉરુગાયપદાબ્જરાગ-
શ્રીકું(ઙ્)કુમેન દયિતાસ્તનમણ્ડિતેન .
તદ્દર્શનસ્મરરુજસ્તૃણરૂષિતેન
લિમ્પન્ત્ય આનનકુચેષુ જહુસ્તદાધિમ્ .. ૧૭..

ઉરુગા + યપદાબ્ + જરાગ, દયિતાસ્ + તન + મણ્ડિતેન
તદ્દર્શનસ્ + મરરુજસ્ + તૃણરૂષિતેન, જહુસ્ + તદાધિમ્

હન્તાયમદ્રિરબલા હરિદાસવર્યો
યદ્ રામકૃષ્ણચરણસ્પર્શપ્રમોદઃ .
માનં(ન્) તનોતિ સહગોગણયોસ્તયોર્યત્
પાનીયસૂયવસકન્દરકન્દમૂલૈઃ .. ૧૮..

હન્તા + યમદ્રિ + રબલા,રામકૃષ્ણચરણ + સ્પર્શપ્રમોદઃ
સહગો+ગણયોસ્+ તયોર્યત્
પાનીયસૂ + યવસકન્ + દરકન્ + દમૂલૈઃ

ગા ગોપકૈરનુવનં(ન્) નયતોરુદાર-
વેણુસ્વનૈઃ(ખ્) કલપદૈસ્તનુભૃત્સુ સખ્યઃ .
અસ્પન્દનં(ઙ્) ગતિમતાં(મ્) પુલકસ્તરૂણાં(ન્)
નિર્યોગપાશકૃતલક્ષણયોર્વિચિત્રમ્ .. ૧૯..

ગોપકૈ + રનુવનં(ન્), કલ + પદૈસ્ + તનુભૃત્સુ
પુલકસ્ + તરૂણાં(ન્)
નિર્યો + ગપાશકૃતલ + ક્ષણયોર્ + વિચિત્રમ્

એવં(વ્) વિધા ભગવતો, યા વૃન્દાવનચારિણઃ .
વર્ણયન્ત્યો મિથો ગોપ્યઃ(ખ્) ક્રીડાસ્તન્મયતાં(મ્) યયુઃ .. ૨૦..

વર્ણ + યન્ત્યો, ક્રીડાસ્ + તન્મયતાં(મ્)

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં(મ્) સંહિતાયાં(ન્)
દશમસ્કન્ધે પૂર્વાર્ધે વેણુગીતં(ન્) નામૈકવિંશોઽધ્યાયઃ .. ૨૧..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

